श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे

# ॥ त्रिपञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ त्रिपञ्चाशः सर्गः ॥

हनुमत्पुच्छं प्रदीप्य राक्षसैस्तस्य नगरे परिचारणम्

तस्य तद्वचनं श्रुत्वा दशग्रीवो महात्मनः।
देशकालहितं वाक्यं भ्रातुरुत्तरमब्रवीत्॥ **5.53.1** ॥

सम्यगुक्तं हि भवता दूतवध्या विगर्हिता।
अवश्यं तु वधायान्यः क्रियतामस्य निग्रहः॥ **5.53.2** ॥

कपीनां किल लाङ्गूलमिष्टं भवति भूषणम्।
तदस्य दीप्यतां शीघ्रं तेन दग्धेन गच्छतु॥ **5.53.3** ॥

ततः पश्यन्त्वमुं दीनमङ्गवैरूप्यकर्शितम्।
सुमित्रज्ञातयः सर्वे बान्धवाः ससुहृज्जनाः॥ **5.53.4** ॥

आज्ञापयद् राक्षसेन्द्रः पुरं सर्वं सचत्वरम्।
लाङ्गूलेन प्रदीप्तेन रक्षोभिः परिणीयताम्॥ **5.53.5** ॥

तस्य तद् वचनं श्रुत्वा राक्षसाः कोपकर्कशाः।
वेष्टन्ते तस्य लाङ्गूलं जीर्णैः कार्पासिकैः पटैः॥ **5.53.6** ॥

संवेष्ट्यमाने लाङ्गूले व्यवर्धत महाकपिः।
शुष्कमिन्धनमासाद्य वनेष्विव हुताशनम्॥ **5.53.7** ॥

तैलेन परिषिच्याथ तेऽग्निं तत्रोपपादयन्।
लाङ्गूलेन प्रदीप्तेन राक्षसांस्तानताडयत्॥ **5.53.8** ॥

रोषामर्षपरीतात्मा बालसूर्यसमाननः।
स भूयः सङ्गतैः क्रूरै राक्षसैर्हरिपुङ्गवः॥ **5.53.9** ॥

सहस्त्रीबालवृद्धाश्च जग्मुः प्रीतिं निशाचराः।
निबद्धः कृतवान् वीरस्तत्कालसदृशीं मतिम्॥ **5.53.10** ॥

कामं खलु न मे शक्ता निबद्धस्यापि राक्षसाः।
छित्त्वा पाशान् समुत्पत्य हन्यामहमिमान् पुनः॥ **5.53.11** ॥

यदि भर्तृहितार्थाय चरन्तं भर्तृशासनात्।
निबध्नन्ते दुरात्मानो न तु मे निष्कृतिः कृता॥ **5.53.12** ॥

सर्वेषामेव पर्याप्तो राक्षसानामहं युधि।
किं तु रामस्य प्रीत्यर्थं विषहिष्येऽहमीदृशम्॥ **5.53.13** ॥

लङ्का चारयितव्या मे पुनरेव भवेदिति।
रात्रौ नहि सुदृष्टा मे दुर्गकर्मविधानतः॥ **5.53.14** ॥

अवश्यमेव द्रष्टव्या मया लङ्का निशाक्षये।
कामं बध्नन्तु मे भूयः पुच्छस्योद्दीपनेन च॥ **5.53.15** ॥

पीडां कुर्वन्ति रक्षांसि न मेऽस्ति मनसः श्रमः।
ततस्ते संवृताकारं सत्त्ववन्तं महाकपिम्॥ **5.53.16** ॥

परिगृह्य ययुर्हृष्टा राक्षसाः कपिकुञ्जरम्।
शङ्खभेरीनिनादैश्च घोषयन्तः स्वकर्मभिः॥ **5.53.17** ॥

राक्षसाः क्रूरकर्माणश्चारयन्ति स्म तां पुरीम्।
अन्वीयमानो रक्षोभिर्ययौ सुखमरिन्दमः॥ **5.53.18** ॥

हनूमांश्चारयामास राक्षसानां महापुरीम्।
अथापश्यद् विमानानि विचित्राणि महाकपिः॥ **5.53.19** ॥

संवृतान् भूमिभागांश्च सुविभक्तांश्च चत्वरान्।
रथ्याश्च गृहसम्बाधाः कपिः शृङ्गाटकानि च॥ **5.53.20** ॥

तथा रथ्योपरथ्याश्च तथैव च गृहान्तरान्।
चत्वरेषु चतुष्केषु राजमार्गे तथैव च॥ **5.53.21** ॥

घोषयन्ति कपिं सर्वे चार इत्येव राक्षसाः।
स्त्रीबालवृद्धा निर्जग्मुस्तत्र तत्र कुतूहलात्॥ **5.53.22** ॥

तं प्रदीपितलाङ्गूलं हनूमन्तं दिदृक्षवः।
दीप्यमाने ततस्तस्य लाङ्गूलाग्रे हनूमतः॥ **5.53.23** ॥

राक्षस्यस्ता विरूपाक्ष्यः शंसुर्देव्यास्तदप्रियम्।
यस्त्वया कृतसंवादः सीते ताम्रमुखः कपिः॥ **5.53.24** ॥

लाङ्गूलेन प्रदीप्तेन स एष परिणीयते।
श्रुत्वा तद् वचनं क्रूरमात्मापहरणोपमम्॥ **5.53.25** ॥

वैदेही शोकसन्तप्ता हुताशनमुपागमत्।
मङ्गलाभिमुखी तस्य सा तदासीन्महाकपेः॥ **5.53.26** ॥

उपतस्थे विशालाक्षी प्रयता हव्यवाहनम्।
यद्यस्ति पतिशुश्रूषा यद्यस्ति चरितं तपः।
यदि वा त्वेकपत्नीत्वं शीतो भव हनूमतः॥ **5.53.27** ॥

यदि किञ्चिदनुक्रोशस्तस्य मय्यस्ति धीमतः।
यदि वा भाग्यशेषो मे शीतो भव हनूमतः॥ **5.53.28** ॥

यदि मां वृत्तसम्पन्नां तत्समागमलालसाम्।
स विजानाति धर्मात्मा शीतो भव हनूमतः ॥ **5.53.29** ॥

यदि मां तारयेदार्यः सुग्रीवः सत्यसङ्गरः।
अस्माद् दुःखाम्बुसंरोधाच्छीतो भव हनूमतः ॥ **5.53.30** ॥

ततस्तीक्ष्णार्चिरव्यग्रः प्रदक्षिणशिखोऽनलः।
जज्वाल मृगशावाक्ष्याः शंसन्निव शुभं कपेः ॥ **5.53.31** ॥

हनूमज्जनकश्चैव पुच्छानलयुतोऽनिलः।
ववौ स्वास्थ्यकरो देव्याः प्रालेयानिलशीतलः ॥ **5.53.32** ॥

दह्यमाने च लाङ्गूले चिन्तयामास वानरः।
प्रदीप्तोऽग्निरयं कस्मान्न मां दहति सर्वतः ॥ **5.53.33** ॥

दृश्यते च महाज्वालः करोति च न मे रुजम्।
शिशिरस्येव सम्पातो लाङ्गूलाग्रे प्रतिष्ठितः ॥ **5.53.34** ॥

अथ वा तदिदं व्यक्तं यद् दृष्टं प्लवता मया।
रामप्रभावादाश्चर्यं पर्वतः सरितां पतौ ॥ **5.53.35** ॥

यदि तावत् समुद्रस्य मैनाकस्य च धीमतः।
रामार्थं सम्भ्रमस्तादृक् किमग्निर्न करिष्यति ॥ **5.53.36** ॥

सीतायाश्चानृशंस्येन तेजसा राघवस्य च।
पितुश्च मम सख्येन न मां दहति पावकः ॥ **5.53.37** ॥

भूयः स चिन्तयामास मुहूर्तं कपिकुञ्जरः।
कथमस्मद्विधस्येह बन्धनं राक्षसाधमैः ॥ **5.53.38** ॥

प्रतिक्रियास्य युक्ता स्यात् सति मह्यं पराक्रमे।
ततश्छित्त्वा च तान् पाशान् वेगवान् वै महाकपिः॥ **5.53.39** ॥

उत्पपाताथ वेगेन ननाद च महाकपिः।
पुरद्वारं ततः श्रीमान् शैलशृङ्गमिवोन्नतम्॥ **5.53.40** ॥

विभक्तरक्षः सम्बाधमाससादानिलात्मजः।
स भूत्वा शैलसङ्काशः क्षणेन पुनरात्मवान्॥ **5.53.41** ॥

ह्रस्वतां परमां प्राप्तो बन्धनान्यवशातयत्।
विमुक्तश्चाभवच्छ्रीमान् पुनः पर्वतसन्निभः॥ **5.53.42** ॥

वीक्षमाणश्च ददृशे परिघं तोरणाश्रितम्।
स तं गृह्य महाबाहुः कालायसपरिष्कृतम्।
रक्षिणस्तान् पुनः सर्वान् सूदयामास मारुतिः॥ **5.53.43** ॥

स तान् निहत्वा रणचण्डविक्रमः
समीक्षमाणः पुनरेव लङ्काम्।
प्रदीप्तलाङ्गूलकृतार्चिमाली
प्रकाशितादित्य इवार्चिमाली॥ **5.53.44** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रिपञ्चाशः सर्गः॥